# कोठारी इंटरनेशनलस्कूल , नॉएडा
## वार्षिक परीक्षा 2025-26
## कक्षा – 9, संस्कृत (119 )

**दिनांक: - बुद्धवार 18 फरवरी 2026** **समय:- होरात्रयम्**

**नाम :--------------------- कक्षा------------** **अंक - 80**

---

**सामान्य निर्देशा: -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति ।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति ।
- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
  'क' खण्ड: : अपठितावबोधनम् 10 अङ्काः
  'ख' खण्डः : रचनात्मककार्यम् 15 अङ्काः
  'ग' खण्डः : अनुप्रयुक्तव्याकरणम् 25 अङ्काः
  'घ' खण्डः : पठितावबोधनम् 30 अङ्काः
- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
- प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

**(खंड 'क')**
**(अपठित अवबोधनम्) (10 अंङ्का:)**

**प्रश्न – 1 अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा भाषा अस्ति । इयं भाषा देववाणी अपि कथ्यते । संस्कृतभाषा संसारस्य सर्वासां भाषाणां जननी अस्ति । सम्पूर्ण- संस्कृतसाहित्यम् अति प्राचीनम् अस्ति । इयं भाषा सर्वासु भाषासु सर्वश्रेष्ठा भाषा अस्ति । संस्कृतभाषाया: हिन्दीभाषाया: च माता पुत्री सम्बन्ध: विद्यते । संसारस्य सर्वासु भाषासु अनेके शब्दा: संस्कृतभाषाया: गृहीता: । अस्माकं सर्वे धार्मिक-ग्रन्था:, वेदा:, उपनिषदा:, पुराणानि च संस्कृतमेव सन्ति । चत्वार: वेदा: यथा- ऋग्वेद: ,यजुर्वेद: ,सामवेद: , अथर्ववेद: च । वेदव्यास - रचितं महाभारतम् , वाल्मीकि - रचितं रामायणम् अपि संस्कृतमेव स्त: । संस्कृतं पठित्वा वयं सुसंस्कृता: भवाम: । अद्यत्वे जना: विदेशेषु अपि संस्कृतभाषां वक्तुम् प्रयत्नशीला: सन्ति । ते संस्कृत- श्लोकानाम् उच्चारणं अति प्रसन्नतया एवम् मनोयोगेन कुर्वन्ति । यत: संस्कृतभाषाया: उच्चारणेन शरीरस्य सर्वेषु अङ्गेषु ऊर्जाया: प्रसार: भवति। अत: सर्वे जना: संस्कृतभाषां अवश्यम् एव पठन्तु ।

**प्रश्ना: -** 1×2=2

**(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**

(i) का भाषा देववाणी अपि कथ्यते ?

(ii) संस्कृतसाहित्यम् कीदृशम् अस्ति ?

(iii) महाभारतम् क: अरचयत् ? 2×2=4

**(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**

(i) संस्कृतभाषाया: हिन्दीभाषाया: च कीदृश: सम्बन्ध: विद्यते ?

(ii) वेदा: कति सन्ति ?

(iii) अद्यत्वे जना: कुत्र संस्कृतभाषां वक्तुम् प्रयत्नशीला: सन्ति ?

**(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत ।** 1×1=1

**(ई) भाषिक कार्यम् – (केवलं प्रश्नत्रयम्)** 1×3=3

(i) "सर्वासु " अस्य पदस्य विशेष्य-पदंकिम् ?

(क)विदेशेषु (ख) सर्वेषु (ग) भाषासु

(ii) "विश्वस्य" अत्र अस्य पदस्य किं पर्यायपदं प्रयुक्तम् ?

(क) शरीरस्य (ख) संसारस्य (ग) भाषाया:

(iii) "नवीनम्" अस्य पदस्य किं पर्यायपदं अत्र प्रयुक्तम् ?

(क) अवश्यम् (ख) प्राचीनम् (ग) संस्कृतम

(iv) गद्यांशात् अव्ययपदं चित्वा लिखत –

(क) अवश्यम् (ख) अत्र (ग) अपि

## (खंड 'ख')
## (रचनात्मकं कार्यम्) [15 अंङ्का:]

**प्रश्न – 2 भवत्याः नाम सुनीता। भवत्याः सखी रमा संस्कृतं पठितुं भवत्याः परामर्श वाञ्छति तां प्रेरयितुं लिखितं पत्रं मञ्जूषायाः सहायतया पूरयित्वा तत्पत्रं पुनः उत्तरपुस्तिकायां लिखतु।** 1/2×10=5

प्रिय-----------(i)!

नमस्ते।

भवत्याः पत्रं प्राप्तम्। भवती संस्कृतभाषां पठितुम् इच्छति,----(ii)------पठित्वा मे प्रसन्नतायाः सीमा नास्ति एषा भाषा सर्वाधिका ---(iii)-----------। संस्कृतम् अस्माक देशस्य प्रतिष्ठा। वेदाः, उपनिषदः, रामायण, महाभारतं, पुराणानि, महाकाव्यानि, कथासाहित्यम् इत्यादिकं सर्वं------ (iv)--------- अत्यन्तं मार्गदर्शकं, ज्ञानवर्धकं प्रेरणाप्रदं च अस्ति । ----(v)------ संस्कृतं पृथक् कर्तुं तथैव न शक्यते यथा पुष्पेभ्यः सुगन्धम्। संस्कृतेन सम्भाषणम् अस्माकं हृदयेषु ----(vi)---------- वर्धयति, हीनभावनां च नाशयति। अतः त्वम् अवश्यं ---- (vii)------ पठ, पठित्वा च------(viii)----- कुरु। एवं वयम् भारतमातुः सेवा कृत्वा धन्या: भवाम:। सर्वेभ्यः अग्रजेभ्य: मम प्रणामाः अनुजेभ्यः च आशीर्वादा:।


भवत्याः सखी

--------(iX)

स्थानम् --------(x)

**मञ्जूषा -** वैज्ञानिकी, प्रचारं, वाङ्मयम्, सुनीता, भारतीयसंस्कृतेः, रमे, इति, गौरवं, संस्कृतं, नवदिल्लीत:

**प्रश्न – 3 चित्रं दृष्ट्वा प्रदत्तानां शब्दानां सहायतया चित्रस्य वर्णनम् पञ्च संस्कृतवाक्येषु कुरुत** 1×5=5



**मञ्जूषा**

विद्यालयः ,सुन्दरं,वृक्षाः,पादपाः,वातावरणं, द्वे छात्रे ,प्रेमभावेन ,पुष्पाणि,प्रसन्ने

**अथवा**

**'रक्षाबन्धनपर्व'** इति विषयम् अधिकृत्य मञ्जूषापदसाहाय्येन संस्कृतभाषायां पञ्चवाक्यानि लिखत।

**मञ्जूषा**

भ्रातुः,भगिनी, राखीबन्धनम्, करोति, आशीर्वादम्, उपहारम्, धनम्, प्रमुदितमनः, सर्वे, देशे, भारतेदेशे ।

**प्रश्न – 4 निम्नलिखितं कथां मञ्जूषापदसाहाय्येन पूरयत -** 1×5=5

एकस्मिन् वने एका मूषिका एकः सिंहश्च (i)-------- स्म। शयानस्य सिंहस्य उपरि (ii) ------- अभ्रमत् तेन कारणेन सिंह जागृतः। गृहीता (iii) -------- अवदत श्रीमन् अपराधं क्षमस्व मां मुञ्चतु । अहं ते उपकारं करिष्यामि। दयार्दः सिंहः हसन् एव ताम् अत्यजत् । एकदा वने सिंह (iv) --------- अभवत् । मूषिका पाशं छित्वा सिंहं (v) -------- अकरोत् ।

**मञ्जूषा**

मूषिका ,मुक्तम् , निवसतः , पाशबद्धः , मूषिका

**अथवा**

**अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्येन पूरयत –**

**पिता**- (पुत्रम्) पुत्र ! कथं तव पठनम् अधुना चलति ?

**पुत्रः** - (पितरम्) तात! (i)------------------------------?

**पिता**- ओह, पुत्र! जीवने केवलं शिक्षायाः आवश्यकता न भवति, स्वास्थ्यमपि आवश्यकं वर्तते ।

**पुत्रः** - (ii)-----------------------------?

**पिता**- एतस्मै योगस्य व्यायामस्य अभ्यासः आवश्यको वर्तते ।

**पुत्रः** - (iii)------------------------?

**पिता**- पुत्र ! समयः तु सर्वेषां समीपे भवति केवलं तस्य वण्टनं कर्तव्यम् ।

**पुत्रः** - (iv)-----------------------------?

**पिता**-पुत्र! प्रातःकाले उचिते समये उत्थाय नित्यकर्म कृत्वा प्रथमम् अध्ययनं कर्तव्यम् पश्चात् उद्यानं गत्वा योग व्यायामञ्च कर्तव्यम् । एतस्य अभ्यासः नित्यमेव करणीयः ।

**पुत्रः**-उत्तमम्, पिताश्री । (v)------------------------------|

**पिता**-शुभं भवतु पुत्र! सफलो भव ।

**मञ्जूषा**

(क) परीक्षायाः समयः निकटेऽस्ति अतः सम्प्रति पठनमेव चलति,

(ख) तर्हि मया किं कर्तव्यम्,

(ग) अद्यतः अहं प्रतिदिनमेव अस्य अभ्यासं करिष्यामि,

(घ) सम्प्रति पठनाय एव समयः अपर्याप्तः भवति योगाय समयः कुत्र,

(ङ) तर्हि तत् कथं प्राप्यते

**(खंड 'ग') [25 अंङ्काः]**

**(अनुप्रयुक्त व्याकरणम्)**

**प्रश्न – 5 अधोलिखित रेखाङ्कितपदानां समुचितं सन्धिविच्छेदं कृत्वा लिखत –(केवलंप्रश्नचतुष्टयम्)** 1×4=4

(क)एषु + एकम् = ------------?

(ख)छाययैव = ----- + -------- ?

(ग) दिवसाः + ते = ------------- ?

(घ) हेतोस्तस्मै = ------ + --------?

(ङ)कः + चन = ------------------?

**प्रश्न – 6 अधः प्रदत्तशब्दयोः उचितं विभक्तिंप्रयोगेण वाक्यं पूरयित्वा पुन: लिखत – (केवलं प्रश्नचतुष्टयम्)** 1×4=4

**(i) बालक: ----------- पठति ।**

(क) संस्कृतम्
(ख) संस्कृतात्
(ग) संस्कृतस्य
(घ) संस्कृतेन

**(ii) बालक: ............. फलं त्रोटयति।**

(क) दण्डाय
(ख) दण्डेन
(ग) दण्डस्य
(घ) दण्डात्

**(iii) छात्रा: ......... परितः क्रीडन्ति ।**

(क) वृक्षात्
(ख) वृक्षान्
(ग) वृक्षाणाम्
(घ) वृक्षेभ्यः

**(iv) छात्रा: ........ सह क्रीडन्ति ।**

(क) छात्रस्य
(ख) छात्राय
(ग) छात्रेभ्य:
(घ) छात्रै:

**(v) ॐ -------- नम: ।**

(क) सूर्यस्य
(ख) सूर्येण
(ग) सूर्याय
(घ) सिंहेन

**प्रश्न – 7 प्रदत्त विकल्पेभ्यः उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयित्वा वाक्यं पुन: लिखत - (केवलं प्रश्नचतुष्टयम्)** 4x1=4

**(i) अहम् -------- गच्छामि।**

(क) राम:
(ख) विद्याम
(ग) विद्यालयस्य
(घ) विद्यालयं

**(ii) अस्माकं ------- नाम के. आई. एस. अस्ति ।**

(क) विद्यालय
(ख) विद्यालयम्
(ग) विद्यालयस्य
(घ) विद्यालयेन

**(iii) ...... विद्यालयं गच्छथ ।**

(क) युवाम्
(ख) त्वम्
(ग) यूयम्
(घ) आवाम्

**(iv) ....... यात्रा तु सफला जाता।**

(क) तव
(ख) तस्य
(ग) मम
(घ) मया

**(v) अस्माकं विद्यालये --------- भविष्यति ।**
(क) महोत्सवाः
(ख) महोत्सवः
(ग) महोत्सवेन
(घ) महोत्सवात्

**प्रश्न – 8 प्रदत्त विकल्पेभ्यः उचित धातु रूपाणि चित्वा रिक्त स्थानानि पूरयित्वा वाक्यं पुन: लिखत - (केवलंप्रश्नचतुष्ट्यम्)** 1x4=4

**(i) श्वः अहं नाटके सैनिक: ------------|**
(क) भविष्यति
(ख) भविष्यसि
(ग) भविष्यामि
(घ) भविष्यथः

**(ii) ते छात्रा: उत्तमान् अंकान् ............ |**
(क) लभते
(ख) लभेते
(ग) लभन्ते
(घ) लभन्ति

**(iii) सारिका कार्याणि ..........|**
(क) करोति
(ख) कुर्वन्ति
(ग) करोमि
(घ) करोषि

**(iv) सर्वदा सत्यम् ............ |**
(क) वाद
(ख) वद
(ग) कुरु
(घ) भविष्यावः

**(v) अत्र बहुनि सुन्दराणि पुष्पाणि** ............ |
(क) विकसन्ति
(ख) विकसति
(ग) गमिष्यति
(घ) पठिष्यति

**प्रश्न – 9 प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयित्वा वाक्यं पुन: लिखत - (केवलंप्रश्नत्रयम्)** 1x3=3

**(i)** संस्कृतं **पठ् + तुमुन्**=.......... छात्रः तत्परः अस्ति ।
(क) पथितुमुन्
(ख) पठुम्
(ग) पठेतुम्
(घ) पठितुम्

**(ii)** रमा **खादित्वा** ......... क्रीडति ।
(क) खाद् + क्त्वा
(ख) खादि + क्त्वा
(ग) खा + ठित्वा
(घ) खादित + त्व

**(iii)** बालक: मातरं **प्र + नम् + ल्यप्** ......... विद्यालयं गच्छति।
(क) प्रनम्य
(ख) प्रणम्य
(ग) प्रणाम
(घ) प्रनमल्य

**(iv)** गोपालः **क्रीडन्** -------- गच्छति ।
(क) क्रीड् + न्
(ख) क्रीड् + अन्
(ग) क्रीड् + शतृ
(घ) क्रीड् + नाम्

**प्रश्न–10 उचितम् अव्ययपदं चित्वा वाक्येषु रिक्त स्थानानि पूरयित्वा वाक्यं पुन: लिखत - (केवलंप्रश्नचतुष्टयम्)** 1/2x4=2
(i) ईश्वर: ........... अस्ति । ( सर्वत्र / अन्यत्र )
(ii) कार्यं ............. ध्यानेन करणीयम् ( ह्य: / सर्वदा )
(iii) त्वम् अधुना ............ गच्छसि ? ( तथा / कुत्र )
(iv) राम: सीता ............ वनं गच्छत: ( च / श्व: )
(v) अहम् ............. संस्कृतं पठामि | ( अद्य / सर्वत्र )

**प्रश्न–11 निम्नलिखितानाम् वर्णानाम् समुचितं उच्चारणस्थानं कोष्ठकात् अवचित्य रिक्तस्थाने लिखत –** 1/2x4=2
**(क) द्** --------- ( तालु:, मूर्धा , दन्त: )
**(ख) य्** --------- ( दन्त: , ओष्ठ: , तालु: )
**(ग) छ** ----------( कंठ: , तालु: , मूर्धा )
**(घ) प्** ----------( ओष्ठ: , नासिका , कंठ: )

**प्रश्न–12 अधोलिखितवाकयेषु अंकानाम् स्थाने संख्यावाचकशब्दै: रिक्तस्थानानि पूरयित्वा वाक्यं पुन: लिखत** 1/2x4=2
(क) रामस्य (2) ----- पुत्रौ आस्ताम् |
(ख) (43) ----- बालिका: मधुरं संस्कृतं गीतं गायन्ति |
(ग) अस्मिन् वाहने (60)-------- यात्रिका: सन्ति |
(घ) मम कक्षायां (77) --------- छात्रा: सन्ति |

## (खंड 'घ') [30 अङ्काः]
## (पठितावबोधनम्)

**प्रश्न–13 अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

आसीत् पुरा कोऽपि महातपा नाम वनवासी मुनिः। एकदा यदा स तरुच्छायोपविष्ट आसीत्। तदा तस्योपरि एका बलाका विष्ठाम् उदसृजत्। स च क्रुद्धस्तां व्यलोकयत्। दृष्टमात्रा एव बलाका भस्मसाद् अभवत्। ततश्च स मुनिः तपःप्रभावाद् अहङ्कारम् उपगतः ।

**प्रश्ना:-**

**I . एकपदेन उत्तरत –** 2x1/2=1
(क) मुने: दृष्टमात्रेव का भस्मसात् अभवत् ?
(ख) मुने: नाम किम् आसीत् ?

**ii. पूर्णवाक्येन उत्तरत –** 1x2=2
(क) तप: प्रभावात् मुनि: कीदृश: अभवत् ?

(ख) क्रुद्धः मुनिः कां व्यलोकयत् ?

**iii. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत –** 1x2=2

(क) `उद्सृजत्` इति क्रियापदस्य कर्मपदम् किम् ?

(i) एका (ii) विष्ठाम् (iii) बलाका (iv) उपरि

(ख) `**ताम्**` इति सर्वनामस्थाने संज्ञापदम् किम् भविष्यति ?

(i) बलाका (ii) बलाकाः (iii) बलाकाम् (iv) बलाकम्

**प्रश्न-14 अधोलिखितम् पद्यांशं(श्लोक) पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे |**
**फलान्यापि परार्थाय वृक्षाः सत्पुरुषा इव ||**

**प्रश्नाः -**

**(i) एकपदेन उत्तरत -** 1/2x2=1

(क) के अन्यस्य छायां कुर्वन्ति ?

(ख) वृक्षाः स्वयं कुत्र तिष्ठन्ति ?

**(ii) पूर्णवाक्येन उत्तरत –** 2x1=2

(क) वृक्षाः किमर्थम् फलन्ति ?

**(iii) निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत –** 1x2=2

(क) `कुर्वन्ति` इति क्रियापदस्य कर्तृपदम् किम् ?

(i) सत्पुरुषाः (ii) परार्थाय (iii) स्वयम् (iv) वृक्षाः

(ख) `छायायाम्` इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

(i) आतपे (ii) फलानि (iii) इवं (iv) परार्थाय

**प्रश्न–15 अधोलिखितम् नाट्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

प्रतापः - धिङ् माम् अधन्यम्, योऽहं मातृभूमि रक्षितुम् असमर्थः । अलं मम एतेन जीवितेन। (दीर्घम् निःश्वसिति )
( यावत् सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चिद् मेवाडराजपुत्रः)

राजपुत्रः (राजोचितं प्रणम्य) विजयतां महाराजः, विजयताम् ।

प्रतापः (समाश्वस्य) अयि भ्रातः ! कथं जयघोषं कृत्वां मां लज्जयसे ?

राजपुत्रः देव ! कथं भवान् वदति एवम् ? किं न खलु कृतं भवता राज्यत्राणाय ? स्वदेशं स्वाधीनं कर्तुं भवता किम् न सोढम् ? विजेष्यते ननु भवान् !

प्रतापः कुतस्तावत् विजयः! स्वदेशमेव त्यक्तुं तत्परोहम् |

भटः (अञ्जलिं बद्ध्वा) महाराज ! नैवं तावत्। स्वामिभाग्यानाम् अनुगन्तारः वयम्। वयं सर्वे त्वाम् अनुगमिष्यामः ।

**प्रश्नाः -**

**(i) एकपदेन उत्तरत -** 1x2=2

(क) स्वदेशं त्यक्तुं तत्परः कः आसीत् ?

(ख) के प्रतापस्य आकृतिम् दृष्ट्वा व्याकुलाः भवन्ति ? 1x1=1

**(ii) पूर्णवाक्येन उत्तरत –**

(क) भटः अञ्जलिं बद्ध्वा प्रतापं प्रति किम् वदति ?

**(iii) उचितं उत्तरं चित्वा लिखत –** 1x2=2

(क) प्रतापः `भ्रातः` इति कं प्रति सम्बोधयति ?

(i) सहचरं प्रति (ii) राजपुत्रं प्रति (iii) जयघोषम्प्रति (iv) मातृभूमिम् प्रति

(ख) `**वीक्ष्य**` इति पदस्य समनार्थकम् पदम् चित्वा लिखत |

(i) प्रणम्य (ii) समाश्वस्य (iii) दृष्ट्वा (iv) बद्ध्वा

**प्रश्न-16 अधोलिखितकथनेषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –** 1x5=5

(क)**वीरगत्या** मरणमेव कल्याणप्रदं भवति |
(ख) शोक: **धैर्यं** नश्यति |
(ग) **उज्जयिन्यां** एक; विप्र: अवसत् |
(घ) नकुलस्य मुखं पादा: च **रक्तेन** विलिप्ता: |
(ङ) एक: चन्द्र: **तम:** हन्ति |

**प्रश्न-17 अधोलिखितम् अन्वयम् मञ्जूषा सहायतया पूरयत –** 1/2x4=2

**भवन्ति नम्रास्तरवः फलोद्गमैः**
**नवाम्बुभिर्भूरिविलम्बिनो घनाः|**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः**
**स्वभाव एवैष परोपकारिणाम् ॥**

**अन्वय: -** तरव: (i) ------------ नम्रा: भवन्ति , (ii) -------------- घना: भूरिविलाम्बिन: (भवन्ति) सत्पुरुषा: (iii) ----------- अनुद्धता: (भवन्ति),(iv) ------------ एष एव स्वभाव: (भवति) |

**मञ्जूषा -** समृद्धिभिः , परोपकारीणाम्, नव-अम्बुभिः , फल-उद्गमैः |

**अथवा**

**निम्नलिखितं श्लोकस्य भावार्थं हिन्दी भाषायाम् लिखत –**

**शोको नाशयते धैर्यं , शोको नाशयते श्रुतम् |**
**शोको नाशयते सर्वं , नास्ति शोकसमो रिपुः ||**

**प्रश्न–18 अधोलिखितवाक्येषु रेखांकितपदानाम् कृते उचितं अर्थं चित्वा वाक्यं पुन: लिखत –** 1x4=4

1. `**<u>धनम्</u>**` इत्यर्थे किम् पर्याय पदम् प्रयुक्तम् |
   (क)गौरवम् (ख)दानम् (ग)वित्तम्
2. `**<u>आय</u>**:` इत्यस्य विलोमपदम् किम् ?
   (क)व्यय: (ख)पात्रे (ग) विनय:
3. मूढै: **<u>पाषाणखण्डेषु</u>** रत्नसंज्ञा विधीयते |
   (क)पर्वतखण्डेषु (ख)भोजनखण्डेषु (ग) रत्नखण्डेषु
4. यस्य तृष्णा विशाला स: तु **<u>दरिद्र:</u>** |
   (क)धनिक: (ख)दुष्ट: (ग)निर्धन:

**प्रश्न–19 अधोलिखितं कथाम् मञ्जूषापदसहायतया पूरयत -** 1/2x8=4

बालः अष्टावक्रः मित्रैः सह (i) ---------- गृहं प्रत्यावृत्तः । स जननीम् अपृच्छत् "मातः ! क्व आस्ते मम पिता" इति। साऽवदत् - "जात ! तव पिता (ii) ---------- जनकस्य सभां विद्वद्भिः सह (iii) ---------- गतः आसीत्, किन्तु अधुना यावत् न प्रतिनिवृत्तः । अहमपि चिन्तातुरा अस्मि।" इदं निशम्य (iv---------- प्रत्यवदत् " जननि ! अलं चिन्तया। श्वः प्रभाते एव अहं (v) ---------- गत्वा ज्ञास्यामि का वार्ता" इति। माताऽवदत् "त्वं बालोऽसि। राजसभायां तव प्रवेशो न (vi) ---------- । तत्र तव उपहासोऽपि संभाव्यते।" विलक्षणप्रतिभासम्पन्नः सर्वशास्त्रपारङ्गतः अष्टावक्रः (vii) ---------- "मातः । मा भैषीः ईदृशीं तादृशीं वा आशंकां मा विधेहि। अहं पित्रा (viii) ---------- क्षिप्रमागमिष्यामि।"

**मञ्जूषा**

| |
|---|
| क्रीडित्वा, राजर्षेः, अष्टावक्रः, राजसभां, सुलभः, शास्त्रार्थाय, अभाषत , सह |